This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

शिवसहस्र० ॥ श्रीशिवायनमः ॥ सूतउवाच ॥ एकदामुनयःसर्वेद्वारिकांद्रष्टुमागताः ॥ वासुदेवंचसो
१ त्कंठाःकृष्णदर्शनलालसाः ॥१॥ ततःसभगवान्प्रीतःपूजांचक्रेयथाविधि ॥ तेषामा
शीरस्तुगृह्णन्बहुमानपुरस्सरं ॥२॥ तैःपृष्टःकथयामासकौमारञ्जन्मतंचयत्नाच्चरितंहमि
नारघ्नंलोकानंदकरंपरं ॥३॥ मार्कंडेयमुखाःसर्वेमाध्याह्निकक्रियोत्थिताः ॥ कृष्णःस्ना
नमथोचक्रेमृदक्षतकुशादिभिः ॥४॥ सूर्योपस्थानसंध्यांचस्मृतिधर्ममनुस्मरन् ॥ शिव
पूजांततःकृष्णोगंधपुष्पाक्षतादिभिः ॥५॥ चकारविधिवद्भक्त्यानमस्कारस्तुतींपुनः ॥ ज
प्रशांकारसोमेशारद्वरद्धेतिचाब्रवीत् ॥६॥ जजापशिवसादस्संन्नक्तिमुक्तिप्रदंविनो।
अनन्यमानसःशांतःपद्मासनगतःशुचिः ॥७॥ ततस्तेविस्मयापन्नाःदृष्ट्वाकृष्णमविचेष्टि
तं ॥ मार्कंडेयोवदत्कृष्णंबहुशोमुनिसंमतं ॥८॥ मार्कंडेयउवाच ॥ त्वंकृष्णःकमला
कांतःपरमात्माजगद्गुरुः ॥ तवपूज्यःकथंशंभुरेतत्सर्वंवदस्वमे ॥९॥ न[illegible]वाच ॥ श्र १

Accession No:- ~~10468~~ M1223
Title:- :- वेदसाराख्य शिवसहस्रनाम
पत्रे ! - (3)

K K S U LIBRARY
RAMTEK
441 106
M-1223
Dist Nagpur

(1)

Checked 2012

त्वातेमुनयःसर्वेमार्कंडेयंसमर्चयन्॥वचोभिर्वासुदेवश्चपृष्टःसाधुत्वयेतिच॥१०॥श्रीरु
द्रउवाच॥साधुसाधुमुनेपृष्टंहितायसकलस्यच॥अज्ञातंतवनास्त्येवतथापिचवदाम्य
हं॥११॥देवतंसर्वदेवानांसर्वकारणकारणं॥ज्योतिर्यत्परमानंदंसावधानमतिःशृणु
॥१२॥विश्वसाधनमीशानंगुणातीतमजंपरं॥जगतस्तस्थुषोह्यात्मामममत्तेनमहामुने॥१३
॥योदेवःसर्वदेवानांध्येयःपूज्यःसदाशिवः॥सशिवःसमहादेवःशंकरश्चनिरंजनः॥१४
॥तस्मान्नान्यःपरोदेवस्त्रिषुलोकेषुविद्यते॥सर्वज्ञःसर्वगःशंभुःसर्वात्मासर्वतोमुखः
॥१५॥पठ्यतेसर्ववेदांतैःसिद्धांतैर्यैर्मुनीश्वर॥तस्मिन्भक्तिर्महादेवेममधातुश्चनिर्मल
॥१६॥महेशःपरमंब्रह्मशांतःसूक्ष्मःपरात्परः॥सर्वातीतःसर्वसाक्षीचिन्मयस्तमसःप
रः॥१७॥निर्विकल्पोनिराभासोनिस्संगोनिरुपद्रवः॥निर्लेपःपुरुषाध्यक्षोमहापुरुषईश्व
रः॥१८॥तस्यचेच्छाभवत्सर्वंजगत्स्थितिसंतकारिणी॥वामांगादभवत्तस्यसोहंविष्णुरितिस्म

न:॥१९॥जनयामासधातारंदक्षिणेंगात्सदाशिवः॥मध्यतोरुद्रमीशानंकालात्मापरमेश्वर
२ ॥२०॥तपस्तपंतुनोवत्साऽब्रवीदितितान्शिः॥ततस्तेशिवमात्मानंप्रोचुःसंयतमानसाः
॥२१॥स्तुत्वातुविविधैःस्तोत्रैःप्रणेमुश्चपुनःपुनः॥ब्रह्माविष्णुशिवाऊचुः॥तपःकेनप्रका
रेणकर्त्तव्यंपरमेश्वर॥२२॥ब्रूहिसर्वमशेषेणस्वात्मानंवेत्सिनापरः॥शिवउवाच॥कायेनमन
सावाचाध्यानपूजाजपादिभिः॥२३॥कामक्रोधादिरहितंतपःकुर्वंतुनोसुराः॥देवाऊचुः॥त्व
यायत्कथितंशंभोदुर्ज्ञेयमजितात्मभिः॥२४॥सौम्योपायमतोब्रूहित्वद्कारुण्यवारिधे॥
शिवउवाच॥शृणुध्वंसर्वपापघ्नंभुक्तिमुक्तिप्रदंनृणां॥सहस्रनामसद्दिव्यंजपंतुममसुव्रताः॥
२५॥अयासंसारमग्नानांमुक्तिर्भवतिशाश्वती॥शृण्वंतुतद्विधानंहिमहापातकनाशनं॥२६
॥पठतांशृण्वतांसद्योमुक्तिःस्यादनपायिनी॥ब्रह्मचारीकृतस्नानःशुक्लवासाजितेंद्रियः॥२
७॥भस्मधारीमुनिर्मौनीपद्मासनसमन्वितः॥ध्यात्वामांसकलाधीशंनिराकारंमुनीश्वरं॥२८ २

पार्वतीसहितंशंभुंजटामुकुटमंडितं॥वसानंच्चर्ममाघ्रंच्चवंशार्द्धकृतशेखरं॥१९॥त्र्यंबकंवृषभा
रूढंकृत्तिवाससमुज्वलं॥सुरार्चितपदद्वंद्वंदिव्यभोगंसुसुंदरं॥२०॥वित्राणांसुप्रसन्नंचकुमा
रवरदान्नयमृगडुरंतकमलासीनंनागयज्ञोपवीतिनं॥२१॥विश्वकायंचिदानंदंशुद्धमक्षरमव्य
यं॥सहस्रशिरसंशंभुमनंतकरसंयुतं॥२२॥सहस्रचरणंदिव्यंसोमसूर्याग्निलोचनं॥जगद्यो
निमजंब्रह्मशिवमाद्यंसनातनं॥२३॥दंष्ट्राकरालंदुःप्रेक्ष्यंसूर्यकोटिसमप्रभं॥निशाकरकरा
कारंभेषजंभवरोगिणां॥२४॥पिनाकिनंविशालाक्षंपशूनांपतिमीश्वरं॥कालात्मानंकाल
कालंदेवदेवंमहेश्वरं॥२५॥ज्ञानवैराग्यसंपन्नंयोगानंदमयंपरं॥शाश्वतैश्वर्यसंपन्नंम
हायोगीश्वरेश्वरं॥२६॥समस्तशक्तिसंपन्नंपुण्यकायंदुरासदं॥तारकंब्रह्मसंपूर्णंमणीयां
समहत्तमं॥२७॥यतीनांपरमंब्रह्मयतीनांतपसःफलं॥संयमीहृत्समासीनंतपस्वीजन
संस्तुतं॥२८॥विधींद्रविष्णुनमितंमुनिसिद्धनिषेवितं॥महादेवंमहात्मानंदेवानामपिदैव

तं॥३९॥शांतंपवित्रमोंकारंज्योतिषांज्योतिरुत्तमं॥शंकरोमेशिरःपातुललटंभाललोचनः॥४०
॥विश्वचक्षुर्दृशौपातुरुद्रोममभ्रुवावपि॥गंडौपातुमहेशानःश्रुतीरक्षतुधूर्वजः॥४१॥कपोलौमे
महादेवःपातुनासांसदाशिवः॥मुखंपातुहविर्भोक्ताओष्ठौपातुमहेश्वरः॥४२॥दंतान्रक्षतुदेवें
द्रस्तालुंसोमकलाधरः॥रसनांपरमानंदःपातुगल्लौशिवाप्रियः॥४३॥चिबुकंपातुमेशंभुःस्म
श्रुंशत्रुविनाशनः॥कूर्चंपातुभवःकंठंनीलकंठोवतुध्रुवं॥४४॥स्कंधौस्कंदपतिर्बाहूवज्रह
स्तधरःसदा॥उपबाहूमहावीर्यःकरौविबुधसत्तमः॥४५॥अंगुलीःपातुपंचास्यःपर्वाणिवसद
स्त्वपातु॥हृदयंपातुसर्वात्मास्तनौपातुपितामहः॥४६॥उदरंजगत्तुकःपातुमध्यंमेमध्यमेश्व
रः॥कुक्षीपातुभवानीशःपृष्ठंपातुकुलेश्वरः॥४७॥प्राणान्मेप्राणदःपातुनाभिंभीमःकटिंविभु
ः॥सक्थिनीपातुमेभर्गोजानुनीजनकाधिपः॥४८॥जंघेपुररिपुःपातुचरणौभवनाशनः॥
शरीरंपातुमेशर्वोबाह्यमाभ्यंतरंशिवः॥४९॥इंद्रियाणिहरःपातुसर्वत्रजयवर्द्धनः॥एवंमां

तुमृडःपातुदक्षिणेमयसूदनः॥५१॥वारुण्यांसलिलाधीशउदीच्यांमेमहीधरः॥ईशान्यांपातु
भूतेशआग्नेयांरविलोचनः॥५२॥नैर्ऋत्यांभूतनाथस्तुवायव्यांबलवर्द्धनः॥ऊर्द्ध्वंपातुम-
हेशस्त्वधःसंसारनाशनः॥[illegible]॥सर्वतःसुखदःपातुबुद्धिंपातुसुलोचनः॥एवंन्यासादि-
कंकृत्वासाक्षाच्छंतुमयोभवेत्॥५३॥ॐनमोहिरण्यबाह्वादिपठेन्मंत्रमनुक्तिमान्॥ॐन
मोहिरण्यबाह्वेहिरण्यवर्णायहिरण्यरूपायहिरण्यपतयेंबिकापतयेउमापतयेपशुप
तयेनमोनमः॥५४॥सद्योजातंप्रपद्यामिसद्योजातायवैनमः॥भवेभवेनातिभवेभवस्व
मांभवोद्भवायनमः॥५५॥ॐवामदेवायनमोज्येष्ठायनमःश्रेष्ठायनमोरुद्रायनमः॥काला
यनमःकालविकरणायनमोबलविकरणायनमोबलप्रमथनायनमःसर्वभूतदमना
यनमोनमोन्मनायनमः॥५६॥अघोरेभ्योऽथघोरेभ्योघोरघोरतरेभ्यःसर्वेभ्यःसर्वशर्वेभ्योन
मस्तेऽस्तुरुद्ररूपेभ्यः॥५७॥ॐतत्पुरुषायविद्महेमहादेवायधीमहितन्नोरुद्रःप्रचोदयात्

४ ॥५८॥ईशानःसर्वविद्यानामीश्वरःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमे
अस्तुसदाशिवोमेअस्तुसदाशिवोम्॥सद्योजातादिभिर्मंत्रैनमस्कुर्यात्सदाशिवं॥त
तःसहस्रनामेदंपवित्रमंमुमुक्षुभिः॥सर्वकायेकरंपुण्यंमहापातकनाशनं॥सर्वगुह्य
तमंदिव्यंसर्वलोकहितप्रदं॥मंत्राणांपरमोमंत्रोभवदुःखविनाशकृत्॥ॐअस्यश्रीपर
महिमशिवसहस्रनामस्तोत्रमंत्रस्य॥श्रीभगवान्नारायणऋषिरनुष्टुप्छंदः॥परमात्मा
शिवमहादेवोदेवता॥नमइतिबीजं॥शिवायेतिशक्तिः॥चैतन्यमितिकीलकं॥श्रीमहादेवप्रीत्य
र्थेजपेविनियोगः॥शिरसिनारायणऋषयेनमः॥मुखे॥अनुष्टुप्छंदसेनमः॥हृदि॥श्रीमहा
देवायदेवतायैनमः॥गुह्ये॥नमःइतिबीजायनमः॥पादयोः॥शिवायेतिशक्तयेनमः॥स
र्वांगे॥चैतन्यमितिकीलकायनमः॥इतिऋष्यादिन्यासः॥पश्चात्करांगन्यासः॥ॐनमःशं ४
भवायचेत्यंगुष्ठाभ्यांनमः॥मयोभवायचेतितर्जनीभ्यांस्वाहा॥शंकरायचेतिमध्यमा

7

भ्यांवषट्॥ मयस्कारायचेति अनामिकाभ्यांहुं॥ शिवायचेतिकनिष्ठिकाभ्यांवौषट्॥ शिव
तरायचेतिकरतलकरपृष्ठाभ्यांनमः॥ इतिकरन्यासः॥ ॐनमः शंभवायचेतिहृदयायन
मः॥ मयोभवायचेतिशिरसेस्वाहा॥ शंकरायचेतिशिखायैवषट्॥ मयस्करायचेति
कवचायहुं॥ शिवायचेतिनेत्रत्रयायवौषट्॥ शिवतरायचेतिअस्त्रायफट्॥ इतिअंगन्या
सः॥ अथध्यानं॥ कैलासाद्रिनिभंशशांककलयास्फूर्जज्जटामंडलं॥ नासालोकनतत्परंत्रि
नयनंवीरासनाध्यासितं॥ मुद्राटंककुरंगजानुविलसद्धस्तंप्रसन्नाननं॥ कक्षाबद्धभुजंग
मंमुनिव्रतंवंदेमहेशंपरं॥ १॥ इतिध्यात्वाजपेत्॥ ॐनमः॥ परायदेवायशंकरायमहात्म
ने॥ कामिनेनीलकंठायनिर्मलायकपर्दिने॥ २॥ निर्विकल्पायशान्तायनिरहंकारिणे
नमः॥ अनघायविशालायशूलहस्तायतेनमः॥ ३॥ निरंजनायशर्वायस्तुताय
चपरात्मने॥ नमःशिवायभर्गायगुणातीतायवेधसे॥ ४॥ महादेवायवीतायपार्व

(8)

तीपतयेनमः॥ केवलायमहेशायविशुद्धायबुधात्मने॥४॥ कैवल्यायसुदेशायनि
ःस्पृहायस्वरूपिणे॥ नमः सोमविभूषायकालायामिततेजसे॥५॥ अजरायजगत्पि
त्रेजनकायपिनाकिने॥ निराधारायसिद्धायमायातीतायतेनमः॥६॥ बीजायसर्प
भूषायपशुनांपतयेनमः॥ पुरंदरायनग्नायपुरुषायमहीयसे॥७॥ महासंतोषरूपा
यज्ञातिनेशुद्धबुद्धये॥ नमोच्छस्वरूपायतपसेपरमात्मने॥८॥ सर्वेजायसुरेशा
यब्रह्मणेनंतमूर्त्तये॥ निरहंकारायसूक्ष्मायकैलासपतयेनमः॥९॥ निरामयायकांताय
निरातंकायतेनमः॥ निरालंबायविश्वायनित्यायपतयेनमः॥१०॥ आत्मारामायन
मायपूज्यायपरमेष्ठिने॥ विकर्त्तनायसूर्यायग्रांतवेविश्वरूपिणे॥११॥ ताराहंसा
यनाथायप्रतिसर्यायतेनमः॥ पारावरेशायरुद्रायनवायालेख्यशक्तये॥१२॥ इंद्धं
सनिधीशायकालदंष्ट्रेमनस्विने॥ विश्वमात्रेजगद्धात्रेजगन्नेत्रेनमोनमः॥१३॥ ज

५

७

टिलायविरागायपवित्रायमृड्डायच॥निरवद्यायपात्रायमेनानांपतयेनमः॥१
४॥नाट्यायरविनेत्रायव्योमकेशायतेनमः॥चतुर्न्नोगायसाराययोगिने१००नंत
मायिने॥१५॥धर्मिष्ठायवरिष्ठायपुरत्रयविघातिने॥गरिष्ठायगिरीशायवरदायन
मोनमः॥१६॥व्याघ्रचर्मांवराया॥श्वदिशावस्त्रायतेनमः॥परमत्रेममंत्रायप्रथमाय
सुचक्षुषे॥१७॥आद्यायशूलहस्तायशितिकंठायतेनमः॥उग्रायवामदेवायश्रीकं
ठायनमोनमः॥१८॥विश्वेश्वरायसूर्यायगौरीशायवरायच॥मृत्युंजयायवीरायवीर
न्नशायतेनमः॥१९॥कामनाशायगुरवेमुक्तिनाथायतेनमः॥विरूपाक्षायसूताय
वह्निनेत्रायतेनमः॥२०॥जालंधरशिरश्छेत्रेदविषेदितकारिणे॥महाकालायवैद्या॥
यसद्गुणेशायतेनमः॥२१॥नमःॐकाररूपायसोमनाथायतेनमः॥रामेश्वरायशु
चयेनौमिशायनमोनमः॥२२॥त्र्यंबकायनिरीहायकेदारायनमोनमः॥गंगाधराय

कावषेनागानाथायतेनमः॥२३॥नमस्मप्रियायस्वस्थायलक्ष्मीशायनमोनमः॥पू
र्णायऋतपतयेसर्वेशायदयालवे॥२४॥धर्मायधनदेशायगजचर्मांबरायच॥ना
लनेत्राययज्ञायश्रीशैलपतयेनमः॥२५॥कृशानुरेतसेनीललोहितायनमोनमः॥
अंधकासुरहंत्रेचपावनायबलायच॥२६॥चैतन्यायत्रिनेत्रायदहनाग्राकरायच॥
सहस्रशिरसेतुभ्यंजयरूपायतेनमः॥२७॥सहस्रचरणायास्मैयोगीहृत्पद्मवासि
ने॥सद्योजातायवंद्यायसर्वदेवमयायच॥२८॥आमोदायप्रगल्भायगायत्रीवल्ल
नायच॥व्योमाकारायविप्रायनमोविप्रप्रियायच॥२९॥अघोरायसुवेशायश्वेतरू
पायतेनमः॥विद्वत्तमायचित्रायविश्वग्रासायनंदिने॥३०॥अधर्मशत्रुरूपायदुंदुन्निर्मे
घनायच॥अजातशत्रवेतुभ्यंजगत्प्राणायतेनमः॥३१॥नमोब्रह्मशिरश्छेत्रेपंचवक्त्रा
यतेनमः॥खड्गिनेहरिकेशायपंचवर्णायवज्रिणे॥३२॥नमःपंचाक्षरायास्मैगोवर्द्धन ६

(11)

धरायच॥प्रवदेसर्वलोकानांकालकूटविषादिते॥२३॥सिद्धेश्वरायसिद्धायसहस्रवदना
यच॥नमःसहस्रहस्तायसहस्रनयनायच॥२४॥सहस्रमूर्त्तयेतुभ्यंविघ्नवेजितशात्र
वे॥काशीनाथायगेहायनमस्तेविश्वसाक्षिणे॥२५॥हेतवेसर्वजीवानांपालकाय
नमोनमः॥जगत्संहारकायायत्रिधावस्थायतेनमः॥२६॥एकादशस्वरूपायनम
स्तेवह्निमूर्त्तये॥नरसिंहमहादर्प्पघातिनेशास्त्रायच॥२७॥नस्मनन्तायतीर्थायजा
ह्नवीजनकायच॥देवदानवदैत्यानांगुरवेतेनमोनमः॥२८॥नादलिताजनत्नासायन
मोवायुस्वरूपिणे॥स्वेच्छामंत्रस्वरूपायप्रसिद्धायनमोनमः॥३९॥वृषध्वजायगोष्ठाय
जगद्यंत्राप्रवर्त्तिने॥अनाथायप्रदेशायविष्णुगर्वहरायच॥४०॥हरेर्विधातुःकलहा
नाशकायनमोनमः॥नमस्तेदशहस्तायगगनायनमोनमः॥४१॥कैवल्यफलदात्रे
तेपरमायनमोनमः॥ज्ञानायज्ञानगम्यायघंटारवप्रियायच॥४२॥पद्मासनायपुष्प

यनिर्वाणायनमोनमः॥अयोनयेसुदेहा ह्यक्तमायनमोनमः॥४३॥अंतकालाधि
पतयेविशालाक्षायतेनमः॥कुवेरबंधवेतुभ्यंसोमायसुखदायिने॥४४॥अमृतेश्व
ररूपायकौबेरायनमोनमः॥प्रियंवदसमर्थायधन्विनेविन्नवेनमः॥४५॥गिरीशा
यगिरीशायगिरीशान्तायतेनमः॥नमस्तेपारिजातायपंचयज्ञायतेनमः॥४६॥तरु
णायविशिष्टायबालरूपधरायच॥जीवितेशायपुष्टायतुष्टानांपतयेनमः॥४७॥त्व
वहेस्पैदिरण्यायकनिष्ठायनमोनमः॥मध्यमायविधात्रेतेश्वरायशुभ्रनगायच॥४८॥
आदित्यतापनायाथनमस्तेरुद्रमन्यवे॥महाह्लादायह्रस्वायवामनायनमोनमः
॥४९॥नमस्तत्पुरुषायाथचतुर्दंस्त्रायतेनमः॥नमोधूर्जटयेतुभ्यंजगदीशायतेन
मः॥५०॥जगन्नाथस्वरूपायलीलाविग्रहरूपिणे॥अनघायनमस्तुभ्यममरायामृ
तायच॥५१॥अघ्नात्रायनमस्तुभ्यंलोकाध्यक्षायतेनमः॥अनादिनिधनायाथनमो

भक्तेतरायच॥५२॥नमोभक्ताय वै तुभ्यं नमस्ते परमाणवे॥ लघुस्थूलस्वरूपाय
नमं परशुधारिणे॥५३॥नमः खट्वांगहस्ताय नागहस्ताय ते नमः॥ वरदाभयहस्ताय
घंटाहस्ताय ते नमः॥५४॥ धस्मराय नमस्तुभ्यमजिताय नमो नमः॥ अणिमादिगुणेशा
य पंचब्रह्ममयाय च॥५५॥ पुरातनाय शुद्धाय बलप्रमथनाय च॥ पुण्योदयाय पद्मा
य विरक्ताय नमो नमः॥५६॥ उदाराय विचित्राय विचित्रगतये नमः॥ वाग्विशुद्धाय वि
तये निर्गुणाय नमो नमः॥५७॥ परमेशाय शेषाय नमः परतराय च॥ महेशाय सुशीला
य करवीरप्रियाय च॥५८॥ महापराक्रमायाथ नमस्ते कालरूपिणे॥ विष्टरश्रवसे
लोकचूडामणाय ते नमः॥५९॥ साम्राज्यकल्पवृक्षाय नमस्तास्त्वं विधीमते॥ वरेण्या
य नमस्तास्त्वं वज्ररूपाय ते नमः॥६०॥ परमज्योतिषे पद्मगर्भाय सलिलाय च॥ तत्वा
धिकाय सर्गाय दीर्घाय स्रग्विणे नमः॥६१॥ पांडुरंगाय घोराय नमस्ते ब्रह्मरूपिणे॥

(15)

निष्कलाय नमस्तुभ्यं शुद्धाय नमो नमः ॥६२॥ नमो जयाय क्षेत्राय क्षेत्राणां पतये नमः
॥ कलाधराय भूताय पंचभूतात्मने नमः ॥६३॥ अनिर्विण्णाय तथ्याय पापनाशकराय च
॥ विश्वतश्चक्षुषे तुभ्यं मंत्रिणे नंतरूपिणे ॥६४॥ सिद्धसाधकरूपाय मेदिनीरूपिणे नमः
॥ अगण्याय प्रतापाय स्वधाहस्ताय ते नमः ॥६५॥ श्रीवत्सनाय ईड्याय मधुराय नमो
नमः ॥ उपाधिरहिताय च नमः सुकृतराशये ॥६६॥ नमो मुनीश्वराय च शिवानंदाय
ते नमः ॥ रिपुघ्नाय नमस्तेजोराशये नुत्तमाय च ॥६७॥ चतुर्मूर्त्तिवपुस्थाय नमो बुद्धी
न्द्रियात्मने ॥ उपद्रवहराय च प्रियसंदर्शनाय च ॥६८॥ नूतनाय च मूलाय वीतरागा
य ते नमः ॥ नैष्कर्म्याय विरूपाय षट्चक्राय विशुद्धये ॥६९॥ कुलेशाय नृतन्नृते भुवने
शाय ते नमः ॥ हिरण्यवाह्वे जीववरदाय नमो नमः ॥७०॥ आदिदेवाय नम्राय चंद्रसंजी
वनाय च ॥ हराय वज्ररूपाय प्रसन्नाय नमो नमः ॥७१॥ आनंदभरिताय च कूटस्थाय

नमोनमः॥ नमो मोक्षफलायाथ ऊर्ध्वताय नमोनमः॥७२॥ विरागिणे नमस्तुभ्यं यज्ञने
त्रे ४०० नमोनमः स्वषेणाय नमस्तुभ्यं दक्षयज्ञविघातिने॥७३॥ नमः सर्वात्मने तुभ्यं
विश्वपालाय ते नमः॥ विश्वगर्भाय गर्भाय देवगर्भाय ते नमः॥७४॥ संसारार्णवमग्ना
नां समुद्धरणहेतवे॥ मुनिप्रियाय खल्वाय मूलप्रकृतये नमः॥७५॥ समस्तसिद्धये ते
जोमूर्त्तये ते नमो नमः॥ आश्रमस्थापनायाथ वर्णिने सुंदराय च॥७६॥ मृगबाणार्पणाया
थ शारदावल्लभाय च॥ विचित्रमालिने तुभ्यं नमस्ते लंकरिष्णवे॥७७॥ वह्निर्मुखमहा
दर्पमथनाय नमो नमः॥ नमोऽष्टमूर्त्तये तुभ्यं निष्कलंकाय ते नमः॥७८॥ मनोहृम्याय
नोज्याय यज्ञनाथाय ते नमः॥ नमो मेध्याय मुख्याय विशिष्टाय नमो नमः॥७९॥ अंबिका
पतये तुभ्यं महादांताय ते नमः॥ सत्यप्रियाय सत्याय प्रियनित्याय ते नमः॥८०॥ नित्य
तृप्ताय वेदित्रे मृडहस्ताय ते नमः॥ अर्द्धनारीश्वरायाथ कुठारायुधपाणये॥८१॥ वराह

नेदिने तुभ्यं नमः कं कालधारिणे॥ महार्घायसुसत्वाय कीर्त्तिस्तंनायते नमः॥७२॥
कृतागमाय वेदान्तपण्डिताय नमो नमः॥ अश्रोत्राय श्रुतिमते बहुश्रुतिधराय च॥
॥७३॥ अघ्राणाय नमस्तुभ्यं गंधावघ्राणकारिणे॥ पादहीनाय वोढुंच सर्वत्र गतये
नमः॥७४॥ अज्ञाय जननेत्राय नमस्तुभ्यं चिदात्मने॥ रसज्ञाय नमस्तुभ्यं रसना
रहिताय च॥७५॥ अमूर्त्तीया ह्यमूर्त्तीय सदसत्वं तये नमः॥ जितेंद्रियाय वै तुभ्यं प
रंज्योतिःस्वरूपिणे॥७६॥ नमस्ते सर्वमर्त्यानामादिकर्त्रे शुवंतये॥ सर्गस्थितीविनाशानां
कर्त्रे तस्मैरकाय च॥७७॥ नमोंतर्यामिणे सर्वहृदिस्थाय नमो नमः॥ चक्रभ्रमणकर्त्रे
ते पुराणाय नमो नमः॥७८॥ वामदक्षिणहस्ते तल्लोके शादरिशालिने॥ नमः सकलक
ल्याय दायिने प्रसवाय च॥७९॥ स्वक्तावोदारधीराय सूत्रकाराय ते नमः॥ विषयार्णव
मग्नानां समुद्धरणहेतवे॥८०॥ अस्ते हस्ते द रूपाय वाङ्नोतिक्रान्तवर्त्तिने॥ यत्र सर्वं

९

यतःसर्वंसर्वंयत्रनमोनमः॥११॥नमोमहार्णवायायभास्करायनमोनमः॥
नमस्तेनक्तिगम्यायनन्तानांसुजनायच॥१२॥दुष्टानांदुःप्रधर्षायविजयायाय
विकेविनां॥अतर्कितायलोकायसुलोकायनमोमनः॥१३॥श्वरायनित्रविशेषाय
श्रुतायचनमोनमः॥नमःकर्पूरदेहायसर्पहारायतेनमः॥१४॥नमःसंसारपाराय
कमनीयायतेनमः॥वह्निदर्पविघातायवायुदर्पविघातिने॥१५॥जरातिगायवी
र्याय५००विश्वस्यव्यापिनेनमः॥सूर्यकोटिप्रकाशायनिष्क्रियायनमोनमः॥१६॥
चंद्रकोटिसुशीतायविमलायनमोनमः॥नमोशुद्धस्वरूपायदिशांचपतयेनमः॥
१७॥नमःसत्यप्रतिज्ञायसमस्तायसमाधये॥एकरूपायशून्यायविश्वनान्निहृदा
यच॥१८॥सर्वोत्तमायकौलायप्राणिनांसुहृदेनमः॥श्रल्लानांपतयेतुभ्यंविना
यनमोनमः॥१९॥ध्येयायध्यानगम्यायध्यानरूपायतेनमः॥नमस्तेशाश्वते

18

श्वर्यविज्ञवायनमोनमः॥१०॥वरिष्ठायचगोप्त्रेनिधानायाग्रजायच॥योग १
श्वराययोगायचयोगगम्यायतेनमः॥१॥नमःप्राणेश्वरायाथसर्वशक्तिधराय
च॥धर्माधारायधन्यायचभक्तलायनमोनमः॥२॥महेंद्रोपेंद्रचंद्रार्कनमिता
यनमोनमः॥महर्षिवंदितायाथप्रकाशायसुधर्मिणे॥३॥नमोहिरण्यग
र्भायनमोहिरण्मयायचजगद्बीजायहरयेसेव्यायक्रतवेनमः॥४॥अधिपत
यकामायचयज्ञासेव्यप्रचेतसे॥नमोब्रह्ममयायाथसकलायनमोनमः॥५॥नम
स्तेरुक्मवर्णायनमस्तेब्रह्मयोनये॥योगात्मनेलक्षितायदिव्यन्यासायतेनमः
॥६॥जगतामेकबीजायमायाबीजायतेनमः॥सर्वहृत्सन्निविष्टायब्रह्मचक्र
क्रमायच॥७॥ब्रह्मानंदायमहतेब्रह्मण्यायनमोनमः॥नृसिंहारार्त्तिसंहर्त्रेवि
षिसारिघ्नायेतेनमः॥५०॥हिरण्यगर्भपुत्राणांशरणसंरक्षणायच॥उर्वसिसेव

ड्डिकाररहितायनमोनमः।।९।।नमोदेहार्द्धकान्तायषडूर्मिरहितायच।।ब्रह्मत्वेन्नवताज्ञायताम्रायपरमेष्ठिने।।१०।।अनन्तकोटिब्रह्माण्डनायकायनमोनमः।।एकाकिनेनिर्मलायद्रविणायदमायच।।११।।नमस्त्रिलोचनायाथत्रिपिविष्टायबंधवे।।त्रिविष्टपेश्वरायाथनमोव्याघ्रेश्वरायच।।१२।।विश्वेश्वरायदात्रेतेनमश्चंडेश्वरायच।।व्यासेश्वरायमुक्षिनेयज्ञकेदारायतेनमः।।१३।।जैगीषव्येश्वरायाथदिवोदासेश्वरायच।।नागेश्वरायन्यायायन्यायनिर्वाहिकायच।।१३।।तारणायस्वपात्रायकालचक्रप्रवर्त्तिने।।त्रिवक्षणायदंष्ट्रायवेदाश्वाय।६००नमोनमः।।१४।।नीलाजीमूतदेहायपरात्मज्योतिषेनमः।।तारणांतपालायमहाबलपरायच।।१५।।सर्वपापहरायाथमहानादायतेनमः।।कृष्णस्पाजयदात्रेतेविघ्नकेदारायतेनमः।।१६।।दिव्यन्तोगायहृतायकोविदायनमोनमः

शिवसहस्र

११

कामपाशाय चित्राय चित्रांगाय नमो नमः ॥१७॥ नमो मातामहायाथ नमस्तेमा
तरिश्वने ॥ निःसंगाय सुनेत्राय विघ्नेशाय जयाय च ॥१८॥ व्याजसंमर्द्दनायाथ
मध्यस्थाय नमो नमः ॥ अंगुष्ठशिरसा लंकानाथदर्पहराय च ॥१९॥ वैयाघ्रचर-
वासाय नमः सर्वेश्वराय च ॥ नमः परावरेशाय जगत्स्थावरमूर्त्तये ॥२०॥ नम-
स्त्वनुपमेयाय शार्ङ्गिणे विष्णुमूर्त्तये ॥ नारायणाय रामाय सुदीप्ताय नमो नमः
॥२१॥ नमो ब्रह्मांडमालाय गोधराय विरूथिने ॥ नमः सोमाय कूष्माय नमः पाता-
लवासिने ॥२२॥ नमस्ताराधिनाथाय वागीशाय नमो नमः ॥ सदाचाराय गौरा-
य स्वायुधाय नमो नमः ॥२३॥ अतर्क्यायाप्रमेयाय प्रमाणाय नमो नमः ॥ कलि
[illegible]ायन्नक्तानां भुक्तिमुक्तिप्रदायिने ॥२४॥ संसारमोचनायाथ वर्णिने लिंगरू-
[illegible] सच्चिदानंदरूपाय पापराशिहराय च ॥२५॥ गजारये विदेहाय त्रिलि-

गरहिताय च ॥ अचिंत्यशक्तये नं अज्ञामनायाच्युताय च ॥ २६ नमो राजाधिरा
जाय चैतन्यविषयाय च ॥ नमः शुद्धात्मने ब्रह्मज्योतिषे स्वस्तिदाय च ॥ २७ ॥ मये
नवे च तुर्ज्ञेयसामर्थ्याय च यज्वने ॥ नमश्चक्रेश्वरायाथ नमो नक्षत्रमालिने ॥ २
॥ अनर्थताज्ञातायाच्युतस्मलेपकराय च ॥ सदानंदाय विडबेसगुणाय विरोधि
ने ॥ २९ ॥ दुर्गमाय शुद्धांगाय मृगव्याधाय ते नमः ॥ प्रियाय धर्मधाम्ने ते योगाय
वज्रांगिने ॥ ३० ॥ नाद्यायामृतपायाथ सोमपाय तपस्विने ॥ नमो विचित्रवेषा
य तुष्टिसंवर्द्धनाय च ॥ ३१ ॥ चिरंतनाय धनुषे ब्रह्माणां पतये नमः ॥ निर्मायायाय
गण्याय व्योमातीताय ते नमः ॥ ३२ ॥ संवत्सराय लोप्याय स्थानदाय स्थविष्ण
वे ॥ व्यवसायफलोताय ७०० महाकर्तृप्रियाय च ॥ ३३ ॥ गुणत्रयस्वरूपाय न
मः सिद्धस्वरूपिणे ॥ नमः स्वरूपरूपाय स्वेच्छाय उरुषाय च ॥ ३४ ॥ काम

स्वरायवेद्यायनमोब्रह्मांडरूपिणे॥अनित्यनित्यरूपायतदंतर्वर्त्तिनेनमः॥
५॥नमस्त्रीधर्म्मायकुल्पायपूर्णायविवटवेनमः॥पंचतन्मात्ररूपायपंचकर्मेन्द्रि
यात्मने॥२६॥विश्वंरवजायदर्पायनमस्तेविषयात्मने॥अनवद्यायशास्त्रा
यस्वतंत्रायामृतायच॥२७॥नमःप्रौढायशाङ्गाययोगारूढायतेनमः॥मंत्रज्ञा
यव्रगज्ञायप्रदीपविमलायच॥२८॥विश्वावासायदक्षायवेदनिश्वसिताय
च॥यज्ञांगायस्कवीरायनागवृंद्यतेनमः॥२९॥व्याघ्रायबाणहस्तायस्कंदा॥
यदक्षिणेनमः॥क्षेत्रज्ञायरहस्यायस्वस्थानायवरीयसे॥३०॥गहनायविरा
मायसिद्धान्तायनमोनमः॥महीधरायगुस्यायवटवक्त्रायतेनमः॥३१॥ज्ञानद
पायदुर्गायसिद्धान्तेनिश्चितायच॥श्रीमतेमुक्तिबीजायकृशालायनिवासिने
॥३२॥वीरकायविशोकायहविर्धानायतेनमः॥गंभीरायमहाम्यायस्तोजना।

23

यस्वन्तोगिने॥४३॥महायज्ञायतीक्ष्णायनमस्तेभूतचारिणे॥नमःप्रतिष्ठिताय २
थमहोत्साहायतेनमः॥४४॥परमार्थायत्रिशूलावेशांगावेचकपालिने॥सहजायंदनापा
यसंस्थानाथायजिष्णवे॥४५॥सद्भिःसंपूजितायाथवितत्नाम्बरघातिने॥२
जनाधिपायसोम्पायकामेशायकिरीटिने॥४६॥अमोघविक्रमायाथन।
ने म्नायदलघातिँ॥संग्रामायनरेशायनमस्तेभ्रष्टचित्तस्मने॥४७॥भूतिप्रिया॥
यायभूम्नेतेसेनायचतुरायच॥मनुष्पबाहुगतयेकृतज्ञायशिखंडिने॥४८
निर्लेपायजटाड्यायमहाकल्पायभैरवे॥नमोविरूपरूपायशक्तिगम्यायते
नमः॥४९॥नमःसर्वायसदसत्तत्पायस्वभूतायच॥नमोत्नक्रिप्रियायाथ।
श्वेतरक्षापरायच॥५०॥स्वक्रमारमहापापहरायरथिनेनमः॥नमस्तेधर्मरा
जायधनाध्यक्षायसिद्धये॥५१॥महाद्भुतायकल्पायकल्पनारहितायच॥स्व २

(25)

तायजितविश्वायगोकर्णायसुचारवे ॥५२॥ श्रोत्रियायवदान्यायदुर्लन्नाय
कृतंबिने ॥ विरजायसुगंधायनमोविश्वंभरायच ॥५३॥ त्रवातीतायतिष्पा
यनमस्तेसामगायच ॥ चिन्मयायनमः शुक्लज्योतिवेद्वेत्रगायच ॥५४॥ अद्वै
तायद्वितीयायकल्पराजायकृतोगिने ॥ सर्वलोगसमृद्धायसंपरायायतेनमः ॥
५५॥ नमस्तेस्वप्रकाशायस्वच्छंदायस्वतंतवे ॥ सर्वज्ञमूर्तयेतुभ्यंगुह्येशायस्वरूपा य
लये ॥५६॥ शारदायसुशीलायकौशिकायअधनायच ॥ अभिरामातत्वायमा
कल्पायतेनमः ॥५७॥ अरिष्टमथनायाथसुप्रतीकायतेनमः ॥ आशावेद्रुल्लग
न्यियवरुणायेंदवेनमः ॥५८॥ नमः कालाग्निरुद्रायरूपामायसुनायच ॥ अ
हिर्बुध्न्यायराजायदुष्टानांपतयेनमः ॥५९॥ नमः समयनाथायसमयायगु १२
ह्यायच ॥ दुर्लंघ्यायनमस्तुभ्यंछंदःसारायदक्षिणे ॥६०॥ ज्योतिर्लिंगायमित्रा

25

यमित्रायजगतांहिताकारिणे।।कालस्पनिश्चयेतुंन्यश्लोकायजलशालिने
।।९१।।ज्ञानोदयायबीजायजगद्धिन्नमहेतवे।।अवधूतायशिष्टायछंद।
सांपतयेनमः।।९२।।नमःफेन्पायगुह्यायसर्वबंधविमोचिने।।उदारकीर्त्तये
शाश्वतत्त्वसन्नवदानायच।।९३।।वसवेवेदकारायनमोत्त्राजिष्णुजिष्णवे।।चक्रि
णेदेवदेवायगदाहस्तायवत्रिणे।।९४।।पारिजातस्त्रुपुष्पायगणाधिपतयेन।
मः।।सर्वशाखाधिपतयेअजनेशायतेनमः।।९५।।सूरिद्धमप्रमाणत्वंयस्वरूपा।। ता×
र्वगतायच।।अशरीरशरीरायअगम्याय१०००नमोनमः।।९६।।सुकेशाय।
सुपुष्पायस्तुतयेपद्ममालिने।।मुनिश्रेयायमुनयेबीजसंस्थमरीचये।।९७।।
चामुंडजनकायाद्यनमस्तेकृत्तिवाससे।।सुकेशायगोप्यायधर्मपीवायते।
नमः।।९८।।महावीर्यायदीप्तायवृक्षायायाशानयेनमः।।विशिष्टेष्टायसेनान्येद्विपा।

सिवसहस्रं देतेनमोनमः॥६९॥कर्णिनांकारणायनमोभगवतेनमः॥बाणदर्पह[illegible]या

१४॥ थनमस्तेऽतीड्यायच॥७०॥रम्यायचनमस्तुभ्यंजनानंदकरायच॥[illegible]

न्नावायसौम्यायचिन्त्यायशशिमौलिने॥७१॥नमस्तेजातुकर्णायस्त[illegible]बाध्य॥

द्धायतेनमः॥ज्योतिषेकुंडलीशायवरदायाभयायच॥७२॥वसंतायस्मरन्न॥

मेजयारिमथनायच॥क्षेमणेत्वरंजनायाथस्पष्टदंष्ट्रायतेनमः॥७३॥रोविष्णवे

ऽस्मरजितेश्वेतपीतायतेनमः॥नमस्तेवंवरीकायतमिश्रमथनायच॥७४॥श॥

मायिनेनिदाघायचित्रगर्भायतेनमः॥शिवालयायस्तुत्यायतीर्थदेवायतेन

मः॥७५॥पतीनांपतयेतुभ्यंविचित्रशाक्रयेनमः॥नमोनिस्तुजरूपायसवि॥ शिव

त्रेतपसेनमः॥७६॥अहंकारस्वरूपायमेधाधिपतयेनमः॥अपारायतत्वविदे १४

ह्वयवीरायतेनमः॥७७॥पंचास्यायायमाण्पायविष्णुप्राणेश्वरायच॥अगो॥

27

चरायययात्मायच्छेत्मायवाडवाग्नये ॥७८॥ विक्रमाय स्वतंत्राय स्वतंत्रगतये ।
नमः ॥ जनानां पतये तुभ्यं नमस्ते जमदग्नये ॥७९॥ अनाहत्ताय शुक्राय मातृ।
कापतये नमः ॥ नमस्ते बीजकोशाय दिव्यानंदाय ते नमः ॥८०॥ नमस्ते विश्व।
देवाय शान्तरामाय ते नमः ॥ विलोचनस्य देवाय हेमगर्भाय ते नमः ॥८१॥ अन २
द्यंताय चंडाय नाथाय च नमो नमः ॥ ज्ञानस्कंदाय तुष्टाय कपिलाय महर्षये ॥८
२॥ नमस्त्रिकाग्निकालाय देवसिंहाय ते नमः ॥ नमस्ते मणिपूराय चतुर्वेदाय।
ते नमः ॥८३॥ स्वरूपाणां स्वभावाय स्वंतर्यागाय ते नमः ॥ नमः श्लोक्याय वन्या
य महाधमयिते नमः ॥८४॥ उसल्लाय नमस्तुभ्यं सर्वात्मज्योतिषे नमः ॥ स्वयं।
भुवे त्रिमूर्तीनामध्यातीताय मन्महे ॥८५॥ ॥१०००॥ श्री शिव उवाच ॥ जपंतु मामि
कां देवानाम्नां दशशातीमिमां ॥ मम चातिप्रियकरी महामोहप्रदायिनी ॥८६॥ सं

28

ग्रामेजयदात्रीतुसर्वसिद्धिमयिंश्रुन्तां॥यःपठेच्छृणुयाद्वापिसर्वपापैःप्रमु
च्यते॥७॥पुत्रकामोलभेत्पुत्रंराज्यकामेस्तुराज्यतां॥प्राप्नुयात्परयाभक्त्या॥
धनधान्यादिकंबहु॥८॥शिवालयेनदीतीरेऽश्वत्थमूलेविशेषतः॥प्रजपे
त्सिद्धिदांदेवाःशुचौदेशेशमीतले॥९॥धनकामस्तुजुहुयात्घृताक्तै
र्बिल्वपत्रकैः॥मोक्षकामस्तुगव्येनघृतेनप्रतिनामतः॥१०॥पुत्रकामस्तुजु
हुयात्तिलाज्येनतथांधसा॥आयुःकामस्तुजुहुयादाज्येनमधुनातथा॥११॥
मत्समीपेप्रदोषेचनत्वाभक्त्याजपेन्नरः॥जीवस्वरूपतांप्राप्यसायुज्यंमम
चाप्नुयात्॥१२॥कालोपिजनश्शास्त्राद्विममनन्तंनपश्यति॥अहंस्वामीसुरास्त
स्यतेभ्यामिगामनस्थले॥१३॥त्रिसंध्यंप्रजपेद्भक्त्यावत्सरंनियमान्वितः॥मच्चित्तो
मन्मनाभूत्वासाक्षान्मोक्षमवाप्नुयात्॥१४॥रुद्रयामेनयस्तुपंचयस्तुपंचवेदया

वतः॥तस्मुणे प्राप्यते पुंभिरेकावृत्त्या पठेदिमां॥९५॥कन्याकोटिप्रदानस्य यत्फ
लं लभते नरः॥तत्फलं लभते सम्यङ्नाम्नां दशशतं जपन्॥९६॥अश्वमेधसह
स्रस्य यत्फलं लभते नरः॥कपिलाशतदानस्य तत्फलं पठनाद्भवेत्॥९७॥यः शृ
णोति सदा विद्वान् श्रावयेद्वापि भक्तितः॥सोपि मुक्तिमवाप्नोति यत्र गत्वा न शोच
ति॥९८॥यक्षराक्षसवेतालाः कूष्मांडग्रहभैरवाः॥पठनाद्यस्य नश्यंति जीवे
च्छरदां शतं॥९९॥ब्रह्महत्यादिपापानां नाशः स्याच्छ्रवणेन तु॥किं पुनः पठ
नाद्यस्य मुक्तिः स्यादनपायिनी॥२००॥इत्युक्त्वा स महादेवो भगवान्परमेश्वरः
पुनरप्याह भगवान्कृपया परयाद्भुतः॥१॥दीयतामात्मनश्रेयो यद्भक्तं भव
घातकं॥इत्युक्त्वांतर्दधे देवः परमानंदस्वरूपवान्॥२॥श्रीकृष्ण उवाच॥एत
देव पुरा रामो लब्धवान्कुंभसंभवात्॥अरण्ये दंडकारण्ये तु पुजजाप रघूद्वहः

30

६२४

शिवसहस्र ॥३॥ नित्यं त्रिषवणं स्नायि त्रिसंध्यासु स्मरन् शिवं ॥ तदासौ देवदेवोपि प्र

१८ त्यक्षः प्राहराघवं ॥४॥ महापाशुपतं दिव्यं गृहाण रघुनंदन ॥ एतदासाद्य पौ

लस्त्यं जहि मा शोकमर्हसि ॥५॥ तदाप्रभृति नो देवाः प्रजपामि स्म नंकिताः ॥

गृहीत्वं तु परया भक्त्या न वत्लाः सर्व एव हि ॥६॥ सूत उवाच ॥ ततस्ते मुनयः सर्वे

जगृहुर्मुनिपुंगवाः ॥ सहस्रनाम सद्दिव्यं भक्तियुक्तेन चेतसा ॥७॥ एतद्वः क

थितं सर्वं हितार्थं मुनिसत्तमाः ॥ गृहीत्वा तु मम वाक्येन मुक्तिं प्राप्स्यथ निश्चितं ॥

८॥ न वञ्जिरात्मशिष्येभ्यो दातव्यमिदमादरात् ॥ नाम्नां सहस्रमेतद्धि लिखितं

यन्निकेतने ॥९॥ अविमुक्तं तु तद्गेहे नित्यं तिष्ठति शंकरः ॥ अनेन मंत्रितं भस्म शिव

५ स्वलुंष्टविनाशनं ॥१०॥ विराचस्य विनाशाय जप्तव्यमिदमुत्तमं ॥ नाम्नां सह

स्रेण नेन समं किंचिन्न विद्यते ॥११॥ इति श्रीपद्मपुराणे उत्तरखंडे सहस्रसं ६

हितायां बिल्वकेश्वरमाहात्म्ये श्रीकृष्णमार्कंडेयसंवादे वेदसाराख्यं शिवसहस्रनामस्तोत्रं संपूर्णं ॥

KKSU LIBRARY
RAMTEK
441 106
M-1223
Dist Nagpur

31

```
[OrderDescription]
,CREATED=20.10.20 12:07
,TRANSFERRED=2020/10/20 at 12:11:58
,PAGES=31
,TYPE=STD
,NAME=S0004213
,Book Name=M-1223-VADESARAJ SHIVSAHASRANAM
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
```

```
FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,
```